# कर्मकाण्डसंस्कारविज्ञानम्



प्रधानसम्पादकः
**प्रो. अर्कनाथचौधरी**

सम्पादकः
**डॉ. शत्रुघ्नपाणिग्राही**

सहसम्पादकः
**डॉ. अश्विन का. राजगोरः**

Scanned by CamScanner

# कर्मकाण्डसंस्कारविज्ञानम्

(महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, श्रीसोमनाथसंस्कृतियुनिवर्सिटी, तथा सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः, इत्येषां संयुक्ततत्त्वावधाने समायोजिता त्रिदिवसीया अखिलभारतीयवेदसङ्गोष्ठ्यां प्रस्तुतशोधपत्राणां संग्रहः)


**आयोजकसंस्थाः**

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
सन्तश्री सन्ध्यागिरिबापुसंस्कृतविद्यालयः

**संरक्षकाः**

पू. सन्तश्रीभगवद्गिरी बापु
प्रो. अर्कनाथचौधरी
प्रो. विरूपाक्षजडिपालः

**प्रकाशकः**

डॉ. महेन्द्रकुमार अं. दवे
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

ISBN : 978-93-83097-23-4

प्रतिलिपयः – ५००
प्रकाशनवर्ष–२०१७
प्राप्तिस्थानम् – सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः,
सामख्याली, कच्छ, गुजरातम् तथा
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

**मुद्रणम्ः**

**जलाराम ग्राफीक्स एेन्ड ओफसेट**
**परमहंस अेपार्टमेन्ट के पास, होटल कावेरी के पीछे,**
**अेस टी रोड, वेरावल - ३६२ २६६.**
**फोन : (०२८७६) २२१८६१**

डॉ. शत्रुघ्नपाणिग्राही

गमनार्थकात् धातोः गोशब्दस्य निष्पत्तिर्भवति । सत्त्वगुणप्रधानानां धर्माणामनुष्ठानेन उत्तरोत्तरमुत्कृष्टप्राप्तिः तथा गतेरस्याः प्राप्तिरस्थानम् आत्मसाक्षात्कारश्च गोशब्देन सूच्यते । ईश्वरस्य विग्रह इव एषामर्थानां सूचकतया गौः स्वीक्रियते । वैदिकवाङ्मये गावः ईश्वररूपाः इति प्रतिपादिताः वर्तन्ते । वयमपि तान् ईश्वरबुद्ध्या पूजयामः । अत्र धर्मप्रधानां गतिं तथा तस्य उत्कृष्टं फलं च गोशब्दः सूचयति । आचार्ययास्कः गोशब्दस्य बहवः अर्थाः कुर्वन्ति । गौरिति पृथिव्या नामधेयम् । यद् दूरङ्गता भवति । यच्चास्यां भूतानि गच्छन्ति । गातेर्वा गाङ्गतौ, इत्यस्य धातोः ओकारो नामकरः प्रत्ययः । गौरित्येतत् पशुनाम भवति एतस्मादेव धातुद्वयाद् गमेर्गातेर्वा । यथापि चर्म च श्लेष्मा च गोशब्देनोच्यत ।[1] ज्यापि गौरच्यते । आदित्योऽपि गौरुच्यते । सर्वेऽपि रश्मयो गाव उच्यन्ते ।[2] वेदेषु गोर्महिमा सर्वत्र दरीदृश्यते । अथर्ववेदस्य चतुर्थकाण्डस्य द्वाविंशतितमसूक्तं गोसूक्तम् व्रत नाम्ना ज्ञायते ।

## सृष्टिरचनायां गोः योगदानम–

वेदः भवति यज्ञप्रधानः । यज्ञसम्पादनार्थमेव वेदस्याविर्भावः । यदा यज्ञे प्रदत्ताहुतिभिः अग्निशिखाः निर्मीयन्ते तदा घृतादिद्रव्यणि वायुरूपेण उपरि गच्छन्ति तदा तस्य सूक्ष्मकणाः तडित्शक्तियुक्ताः भवन्ति । अकाशे स्थितानां धूलिकणानां धूमकणानाञ्च संयोगेन या तडित्शक्तिः सञ्चिता भवति तेन मेघानां सृष्टिर्भवति । यस्मात् कारणात्सृष्टिप्रक्रिया प्रचलति । अतः विश्वस्य यत् मौलिकं तत्त्वं विद्यते येन अस्य विश्वस्य सृष्टिः स्थितिः विनाशश्च भवति तदेव यज्ञशब्देन आख्यायते । यज्ञकर्मणि देवानामावाहनं भवति । ते देवाः विश्वस्य पालने महत्वपूर्णभूमिकां निर्वहन्ति । ब्रह्माण्डस्योद्गमस्थलं यज्ञो वर्तते ।[3] यज्ञकर्मसम्पादनेन सम्पूर्णजगत् नियन्त्रितं भवति ।[4] सम्पूर्णजगतः सत्ता अस्मिन्यज्ञे निहिता, सृष्टेः अन्ते अयं यज्ञ एव अवशिष्यत इति ब्राह्मणवचनम् ।[5] वैज्ञानिकदृष्ट्या यज्ञकर्मणि अग्निना सह द्रव्याणां संयोगमेव सृष्टिरचनाकार्यमित्युच्यते । श्रूयते कात्यायनश्रौतसूत्रे यथा– **देवतोद्देश्येन द्रव्यत्यागो यागः** ।[6] अर्थात् देवान्नुदिश्य अग्नौ द्रव्यस्य संयोगः भवति चेत् यागः भवति । योगनाम एकेन सहापरस्य मिलनम् । यागोऽपि द्रव्यस्य तथा देवतायाः संयोगो भवति । यद्यपि यज्ञेषु देवतोद्देशेन हविषस्य त्यागः इत्येव यज्ञपदार्थो ज्ञेयः । अतएव सोमक्रयाय या सोमक्रयणी गौः, तस्या सोमक्रयार्थं नीयमानाया भूमौ यत्र सप्तमं पदं पतति तस्मिन्नेव स्थाने घृताहुतिर्दीयते । यथा– सप्तमे पदे जुहोति इति ।[7] अतः यागकर्मणि घृतस्य महत्त्वपूर्णं स्थानं विद्यते । यज्ञेन मेघाः निर्मीयन्ते, वृष्टिर्भवति ।[8] वायुमण्डले ओजननामकस्यावरणस्य निर्माणं प्राकृतिकी क्रिया वर्तते । ओजन इति आवरणं समतापमण्डले पृथ्वितः ३० किलोमीटर उपरि निवसति । इदं रक्षाकवचं भवति पृथिव्याः १ इदमावरणं सूर्यकिरणात् समागतेभ्यः Altr Violet किरणेभ्यः पृथिव्याः रक्षां करोति । परन्तु सम्प्रति शीतलभण्डाराणां वातानुकूलितयन्त्राणां प्रयोगेण च ओजनस्तरस्य ह्रासः भवति । अग्नौ घृताहुतिप्रदानेन एलोइक नामक अम्लस्योत्पत्तिर्जायते । एलोइक–अम्लम् ओजनस्तरस्य वृद्धिं करोति । वायुमण्डले आक्सीजन तथा कार्बन्–डाईआक्साइडवायोः सन्तुलनं घृताहुतिमाध्यमेन भविष्यतीति बहुविधपरीक्षणैः वैज्ञानिकाः साधितवन्तः । गवां घृतं सृष्टिरचनायां सृष्टिसंरक्षणे च महत्त्वपूर्णं स्थानं निर्वहति ।

## अग्निहोत्रादियागेषु गौः–

शास्त्रेषु अग्निहोत्रशब्दः व्यापकत्वेन गृह्यते । शतपथब्राह्मणादिषु ग्रन्थेषु प्राजापत्यम्,[9] सूर्यः,[10] प्राणः,[11] गौः,[12] स्वर्यः,[13] रेतः,[14] इत्यादयशब्दाः अपि अग्निहोत्रवाचकाः भंवन्ति ।



Scanned by CamScanner

गौर्वा अग्निहोत्रम् तैत्तिरीयवचसा गौरेव अग्निहोत्रपदवाच्यत्वेनाभिधीयते । अतः गव्यं पञ्चप्रकारकं अग्निहोत्रे संस्कारकरणे प्रयुज्यते । पञ्चगव्यं नाम दुग्ध–दधि–घृत–गोमूत्र–गोमयानां समवायः । अग्निहोत्रकर्माणि आदौ वेदिसंस्काराय गोमूत्रगोमयलेपनमावश्यकम्, ततः घृतदधिपयोभिः आहुतयः प्रदीयन्ते अतः पञ्चगव्यानां यागेन सह समवायसम्बन्धः । गोमयलेपनेन वेदिशुद्धिः शुद्धौ च वेद्याम् आहुतयः, आहुतिभिः पर्यावरणशुद्धिः, तेन च रोगनिवृत्तिः पुनश्च विश्वकल्याणं सम्पद्यते ।

**धर्मस्वरूपः गौः –**

धर्मस्य वृषभरूपेण प्रतिपादनं भगवता मनुना स्वकीयमनुस्मृतौ कृतं वर्तते ।[15] पुराणशास्त्रेष्वपि भगवता व्यासदेवेन एतद् वचनम् अङ्गीकृतम् ।[16] न तु केवलं पुराणादि शास्त्रेषु वेदोक्तग्रन्थेष्वपि कल्पनेयं बहुत्र दृश्यते, यथा– ऋषभस्य रेतस्युपेन्द्र तव वीर्यं । इत्यत्र इन्द्रवीर्यं ऋषभवीर्यमेवेति उक्तम् । परमेश्वरस्य वाहनरूपेण प्रसिद्धः ऋषभो धर्मादन्यो न कश्चिद् भवति । ऋषभरूपधर्मं तत्पत्नीः गाः । गोभिः गोलोपकारो भवति । यज्ञानुष्ठानद्वारैव धर्मः फलप्रदो भवति ।[17] तस्माद्धर्मो वृषभरूपेण धर्मानुष्ठानं च गोरूपेण वर्ण्यते । धर्मस्यानुष्ठानम् इन्द्रेभ्यो जायते । गो शब्दस्यापरार्थः इन्द्रियोऽपि वर्तते । अतः इन्द्रियसंयमता अपि धर्मः कथ्यते । ईश्वरस्य अवस्थाभेदमात्रो धर्मः । धर्मेण अस्य विश्वस्य पालनं प्रतिष्ठां च भवति । धर्मानुष्ठानसदृशं किञ्चिद्वस्तु नास्त्यैव । सालग्रामशिला विष्णोर्लिङ्गं यद्वत्तद्वदेव गौः धर्मस्य लिङ्गम् अथवा विग्रहो भवति । यतः सनातनधर्मानुयायिभिः गावः ईश्वरविग्रहवत् पूज्यन्ते ।

**अन्नरूपा गौः–**

अश्वमेधयागप्रसङ्गे कस्य मात्रा न विद्यते इति प्रश्नः यदा आगच्छति तदा गोस्तु मात्रा न विद्यते[18] इति उत्तरं मिलति । किमर्थम् इत्युक्ते गवां घृतेन अग्नौ आहुति दीयते चेत् तर्हि तस्मात् एलोइकअम्लस्य निष्पत्तिर्जायते येन कारणात् ओजनस्तरस्य वृद्धिर्भवति, तस्मात् कारणात् घनीभवनप्रक्रिया सम्यक् रूपेण जायते । एतदर्थं गावः अस्माकम् अन्नरूपाः सन्ति । श्रूयते यथा–

**अन्धस्थान्धो वो भक्षीय महस्थ महो वो भक्षीयोजस्थोर्जं वो भक्षीय रायस्पोषस्थ रायस्पोषं वो भक्षीय ।**[19] अर्थात् हे गावः ! यूयमन्धस्थ अन्नरूपाः स्थ । क्षीराज्यादिरूपस्यान्नस्थजनकत्वादन्नत्वोपचारः । अतो भवत्प्रसादाद्वो युष्मात्संबन्धि अन्धः क्षीराज्यादिरूपमन्नमहं भक्षीय । तथा यूयं महस्थ पूज्यरूपाः स्थ । अतः युस्माकं पूज्यानां प्रसादादहमपि पूज्यत्वं सेवेय । गौनै पदा स्प्रष्टव्ये त्यादिस्मृतेर्गवां पूज्यत्वप्रसिद्धिः । अत्र महः शब्देन दश वीर्याण्युच्यन्ते । तानि यथा– **गौवैं प्रतिधुक् तस्यै शृतं तस्यै शरः तस्यै दधि तस्यै रधिरसः तस्याः** आतञ्चनं **(दधिपिण्डः) तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनम् इति श्रुत्युक्तानि** ।[20] गोक्षीरादेर्बलहेतुत्वात् बलरूपाः स्थः ।। वैश्या हि क्षीराज्यादिक्रयेन धनं पुष्यन्ति अतो धनपुष्टिरूपाः स्थः ।

**प्रसिद्धपशुयागेषु गोमेधस्वरूपस्य वर्णनम्–**

वैदिकवाङ्मये गोमेध–पुरुषमेध–अश्वमेध– अविमेघ– अजामेधाख्याः पञ्चपशुयागाः वर्णिताः । अत्र मनसि प्रश्नः आगच्छति किं गोमेधादिषु निर्दिष्टाः पशवः प्राणिविशेषा एवाभिप्रेता उतैते सृष्टियज्ञे वर्तमानानां केषांचिद् आधिदैविकपदार्थानां प्रतिनिधिभूताः ? अपि च गोमेधादिषु द्रव्ययज्ञेषु गवादीनां वधोऽभिप्रेतः न वा इति जिज्ञासायाम् अथर्ववेदे गवाश्वपुरुषा न केवलमहिंस्या एवोक्ता अपितु यस्तेषां वधकस्तस्य वधोऽप्यादिष्टः । श्रूयते यथा –



Scanned by CamScanner

यदि नो गां हंसि यद्यश्वं यदि वा पूरुषम् ।

तं त्वा सीसेन विध्यामो यथा नोऽसो अवीरहा ॥[21]

शुक्लयजुषस्त्रयोदशाध्यायेऽपि पुरुष–अश्व+–गो–अविरूपाणां पशूनां हिंसा निषिद्धा वर्तते ।[22] यज्ञकर्मणि या हिंसा सा हिंसा न भवतीति वचनमपि कलियुगे ग्राह्या न भवति । यतोहि पराशरस्मृतौ लिखितं वर्तते–

अश्वालम्भं गवालम्भं संन्यासं पलपैत्रिकम् ।

देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत् ॥[23]

परन्तु सम्पूर्णवाङ्मये कुत्रापि गोमेधसंज्ञकस्य कर्मणः वर्णनं न दृश्यते । ऐतरेयब्राह्मणे[24] गवामयनसत्रस्य विधानं वर्तते, परन्तु तत्र गोपशोरालभनस्य विधानं नास्ति । अत्र गावो शब्देन आदित्याः निर्दिष्टाः ।[25] अयनं नाम तस्या गतेर्वाचकम् । आदित्यानां अतिरेव गवामयनम् । तथापि श्रौत्रसूत्रादिषु यत्र क्वचिदपि गवालम्भनं विहितं तत्र प्रायेण सर्वत्रैव गोः स्थाने आमिक्षया पयस्यया घृतेन[26] वा तत्कर्कसमापनमुक्तम् ।

गोः लोकोपकारकत्वम्–

गव्यानां क्षीरदधिघृतादीनां मनुष्यजीवनेऽस्ति महत्त्वपूर्णं योगदानम् । क्षीरादयो पदार्थाः रुचिकराः भवन्ति । श्राद्ध–यज्ञादिक्रियासु घृतादयः महत्त्वपूर्णस्थानं निर्वहन्ति । गोमयस्य हि कृषिपोषकरूपेण शुष्कस्य तस्य इन्धनरूपेण च उपयोगोऽस्ति । ओषधिसंस्कृतस्य गोमूत्रस्यापि उपयोगिता वर्तते । पञ्चगव्यं पापनाशकमिति सनातनधर्मानुयायिनां विश्वासः । मृतानामपि तासां चर्मास्थिविषाणादीनि तथा विशिष्य गोरोचनञ्च बहुधा उपकारकाण्येव । अतः यज्ञकर्माणि सनातनधर्मानुयायिभिः गावः ईश्वरसमानं पूज्यन्ते ।[27]

अतः निष्कर्षरूपेण वक्तुमिच्छामि यत् वैदिकसाहित्ये गोः स्थानं महत्त्वपूर्णं वर्तते । गावः अस्माकं भारतीयानां कृते देवरूपाः सन्तिः । अतः महाभारते उक्तं वर्तते –

गावो ममाग्रतो नित्यं गावः पृष्ठत एव च ।

गावो मे सर्वतश्चैव गवां मध्ये वसाम्यहम् ॥[28] इति शम् ॥

संदर्भसूचि :–


१. गोभिः सन्नद्धो असि वीलयस्व – ऋग्वेदः – ६/४७/२६

२. निरुक्तम् – २/२

३. यज्ञः बभूव भुवनस्य गर्भः । तैत्तरीयब्राह्मणम् – २/४/७//५

४. यज्ञो वै विश्वरूपाणि यज्ञनेवैतेन सम्भरति । जै. ब्रा. १/७४

५. यज्ञ एव अन्ततः प्रतितिष्ठति । तैत्तरीयब्राह्मणम् १/८/१/२

६. कात्यायनश्रौतसूत्रम् – १/२

७. तै. सं. – ६/१/८/१

८. ऋग्वेद: १/१६४/५१

९. प्राजापत्यमग्निहोत्रम् – शत. ब्राह्मणम्– २/३//१/१

१०. सूर्यो ह वा अग्निहोत्रम् – शत. ब्राह्मणम्–११/३/१/८

११. प्राण एवाग्निहोत्रम् – शत. ब्राह्मणम्–११/३/१/८

१२. गौर्वा अग्निहोत्रम् – तै. २/१/५/३

१३. स्वर्ग्यं वारेऽएतदग्निहोत्रम् – शत. ब्राह्मणम् – १२/४/२/७

१४. रैतो वा एतद्वजिनमाहिताग्ने: यदग्निहोत्रम् – तैतरीयसंहिता

१५. वृषो हि भगवान् धर्म: – मनुस्मृति:– ८/१६

१६. वृषं मृणालधवलम्...... – श्रीमद्भागवत – १/१७/२

१७. यागादिरेव धर्म: – मिमांसादर्शनम्

१८. शुक्लयजुर्वेद: – २३/४८

१९. शुक्लयजुर्वेद: – ३/२०

२०. शतपथब्राह्मणम् – २/३/३/३

२१. अथर्ववेद: – १/१६/४

२२. गां मा हिंसीरदितिं विराजम् – यजुर्वेद: – १३/४३

२३. वेदार्थपारिजात – भाग–२, पृष्ठ – २०४६

२४. ऐतरेयब्राह्मणम् – ४/१७

२५. उताद: पुरुषे गवि – ऋग्वेद: – ६/५६/३

गवामयनेन यन्ति । गावो वा आदित्या: । – ऐतरेयब्राह्मणम्

गौरादित्यो भवति– गमयति रसान्, गच्छन्त्यन्तरिक्षे । – निरुक्तम् – २/४

२६. आप. श्रौत. –१३/२५/१०, अभायाभावे पयस्या – कात्या. श्रौत– १०/९/१६

२७. महाभारतम् – अनु.–२९/७७

२८. महाभारतम् – अनु.–८०/१

वेदवेदाङ्गसङ्कायाध्यक्ष:,

श्रीसोमनाथसंस्कृतयुनिवर्सिटीं, वेरावलम्, गुजरात

Scanned by CamScanner